National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(64): 349-351
© 2026 NJHSR
www.sanskritarticle.com

**डॉ.पवित्रकुमारनन्दः**
अध्यापकः, संस्कृतविभागः,
नयागडप्रजामण्डलमहिलामहाविद्यालयः,
नयागड

**Correspondence:**
**डॉ.पवित्रकुमारनन्दः**
अध्यापकः, संस्कृतविभागः,
नयागडप्रजामण्डलमहिलामहाविद्यालयः,
नयागड

# साम्प्रतिकसमाजपरिप्रेक्ष्ये प्राचीनस्त्रीधर्मस्य स्वातन्त्र्यस्य च एकमध्ययनम्

**डॉ.पवित्रकुमारनन्दः**

**शोधसारः**

साम्प्रतिकसमाजे स्त्रीणां स्वातन्त्रं प्राचीनकालात्सम्पूर्णं भिन्नं परिलक्ष्यते। श्रुतिस्मृतिपुराणेषु यद्यपि स्त्रीणां स्वातन्त्र्यप्रसङ्गे पत्या सह यागादिसम्पादने दायप्रसङ्गे गृहस्थधर्मप्रसङ्गे सहकारित्वेन अभिहितमासीत् तथापि पूर्णतया स्वातन्त्र्यं नावलोकितम्। साम्प्रतिककाले समाजे पुरुषैः सह स्त्रीणामपि समानता भृशं लक्ष्यते। परन्तु वैदिकशब्दराशौ स्त्रीशूद्राणां संस्कारहीनकारणादेव स्वाध्यायाधिकारो न बभूव। परन्तु तत्र बहुधा परिवर्त्तनं समाजे स्वतः समायातम्। वैदिककालादनन्तरं पौराणिकतत्त्वावगाहनादेवं स्त्रीणां भर्त्तुः सेवा परमधर्मः इति सुतरां श्रूयते। पौराणिकसम्वादेषु स्त्रीणां प्रधानं श्रेष्ठं च कर्त्तव्यं पत्युः सेवा मन्यते स्म। परन्तु तस्मात्कालादीदानीन्तनसमाजे बहुतरं परिवर्त्तनं जातम्। स्त्रीणां प्रत्येकं क्षेत्रे सहभागिता पुरुषैः सह भवति। कदाचिदपि स्त्रीणां प्रति अवहेलितभावना कस्यापि मनसि न भूयादिति विधिः व्यपदिष्टः। यतः समाजस्य प्रमुखमङ्गत्वेन स्त्रीणामपि प्रतिपत्तिः श्लाघ्यते। साम्प्रतिकसमाजे स्त्रीणां समधर्मतामपादयितुं विधिकव्यवस्थायामपि अनुशासनयुक्तनियमाः संलग्नाः भवन्ति। अतः इदं स्पष्टरीत्या वक्तुं शक्यते यत् प्राचीनकाले श्रुतिस्मृतिपुराणादिसमये यथा स्त्रीणां मर्य्यदा बभूव तस्मात्साम्प्रतिकसमाजे उत्तरोत्तरं प्रगतिः लक्ष्यते।

**वैदिकसंस्कृतौ स्त्रीणां प्रशस्तिः स्वातन्त्र्यञ्च**

समाजस्याद्यस्रोतसि परिभूयमानं शास्त्रं सर्वथा प्राणीनां धर्मार्थकाममोक्षाख्यपुरुषार्थानां प्राप्तिहेतुभूतं तत्त्वं विमृशति। तत्र प्रपञ्चे विद्यमानसर्वप्राचीनग्रन्थस्तावद्वेदराशिः पुरुषार्थसाधने मार्गदर्शनं विदधाति। तत्र स्वाध्यायस्त्वेन वेदो नित्यमध्ययनशीलस्तस्मादेव परमपुरुषार्थस्य संप्राप्तिरिति द्विजातीषु प्रसक्तिः। तत्र जन्मनादन्त्येष्टिकर्म यावद्गर्भाधानादिसंस्काराणामनुपपत्तिहेतुभूतपरमार्थतत्त्वमजानतां स्त्रीशूद्राणां कृते स्वाध्यायस्य प्राचीनमनुपपत्तिः सुतरां लक्ष्यते। तत्रापि बहुधा शास्त्रीयप्रसक्तिरनुपपद्यते। यतो बहव्यः स्त्रियः स्वाध्यायस्यानुषङ्गिककर्मणि शूद्धतामादाय नैकमन्त्राणां दर्शनं चक्रुः। तासां सकाशाद् वैदिकसंस्कृतौ नारीणां मर्य्यादायां परिबृहणं जातम्। यतः साक्षान्मन्त्रपङ्क्तौ श्रूयते हि

> **"अहं केतुरहं मूर्धाऽमुग्रा विवाचिनी।**
> **मेदनु क्रतुँ पतिः सेहानाया उपाचरेत्॥"**[1]

अन्यच्च स्त्रियो हि ब्रह्मस्वरूपेति बहुत्र भाष्योक्तपङ्क्तिषु स्कन्दवेङ्कटमाधवसायणादिभाष्यकारैः उच्यते। **"स्त्री हि ब्रह्म बभूविथ"**[2] मन्त्रराशिस्तावत्तत्प्रमाणमभिदधाति। अन्यच्च श्रुतिपरम्परामुपाश्रित्य स्मृतिशास्त्रे मनुः सर्वादौ जुघोष यत्

> **"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता ।**
> **यत्रैतास्तु न पूज्यन्ते सर्वात्राफला क्रियाः॥"**[3]

अथर्ववेदसंहितायाः स्त्रीणां प्रशस्तये अपि बहुधा शास्त्रसम्मतं प्राशस्त्यमभिहितं वर्तते। यत्र नारीणां स्थितिः सुदृढा भवति तत्र देवाः रमन्ते। यथा पुत्रादिषु प्रीतिः समेषां समुपजायते तद्वन्माता पत्नी भगिनीत्वेन स्त्रीणामपि अनुव्रता स्थितिः स्यादेव। उच्यते अस्मिन् प्रसङ्गे यत्

**अनुव्रतः पितुः पुत्रो माता भवतु सम्मना।**
**जाया परये मतुमती वाचं यददु शान्तिवाम्॥**[4]

प्राचीनसाहित्यस्य शास्त्रीयमवलोकनादित्थं प्रतीयते यद् भार्या पुरुषस्य सहधर्मिणी बभूव। गृहस्य शोभा भार्यया सार्द्धं गृहस्थाश्रमस्य धर्मपालनं परमधर्मत्वेन परिगणितमास्ते। परन्तु तथा स्वातन्त्र्यं स्त्रीणां यथेदानीं परिभूयते न तथा कदाचित् आसीत्। यतः समाजस्य सुष्ठुपरिचालनार्थमुभयोः समन्वयः सुतरां कांक्ष्यते। तदर्थं कथ्यते मनुस्मृतौ

**"न गृह गृहमित्याहुः गृहिणी गृहमुच्यते।**
**स्त्रीभिर्भर्तुर्वचः कार्यमेषः धर्मः परः स्त्रीणाम्।**
**आशुद्धेः संप्रती क्षयो हि महापातक दूषित॥"**[5]

वैदिकप्रस्थानस्यान्तिमकाले स्त्रीणां स्वातन्त्र्ये काचिद् भिन्नता परिलक्षिता जाता। परन्तु बहुत्र शास्त्रेषु तासां प्रतिपत्तिः सुतरामासीत्। मन्वादिभिः स्मृतितत्त्वदर्शिभिर्वैदिकमार्गोपेतस्त्रीणां मर्य्यादायां कदाचिदपि वैमतं न विहितम्। स्त्रियः सदैव भूषणाच्छादनैः पूज्याः गृहस्य शोभातिशायिहेतुत्वेन सुतरां स्वीक्रियन्ते। कथ्यते मनुना -

**"भर्तुभ्रातृपितृज्ञातिश्वश्रश्वशुरदेवरैः।**
**बन्धुमिश्रस्त्रियः पूज्या भूषणाच्छादनाशनैः॥"**[6]

**स्त्रीधर्मः**

वैदिकप्रस्थाने श्रौतपरम्परायाञ्च यागे पत्न्या सह पत्युः अधिकारो बभूव। पत्नीं विना यागः पूर्णतां न आप्नुयात् कदाचित्। तदर्थं रामायणकाले भगवता मर्य्यदापुरुषोत्तमेन श्रीरामेण सीतायाः प्रतिमूर्त्तिं विधाय प्रतिष्ठा कृतेति सर्वथा लोकप्रमाणम्। अतस्तावत्तत्कालीनसमाजे कर्त्तव्यविधाने समुचितस्थलेषु पुरषैः सह स्त्रीणां समानाधिकारः आसीत्। कालान्तरे अप्रतिहतरीत्या नैकेषु स्थलेषु स्त्रियः कदाचित् शोषिताः पीडिताः निष्पेषिताश्च अभूवन्। परन्तु समकालस्थितौ तासामपि प्रतिपत्तिः सुतरामभिवर्धिता जाता।

यज्ञसम्पादने स्त्रीणामपि पत्या सह सहभागिता आतीत्। पत्नीं विना यज्ञः यज्ञफलं न विन्दति। अतः स्त्रीभिस्सार्द्धं सदैव सस्नेहतामाचरेयुः।

**"सूत्रकाले स्त्रीणां यज्ञसंपादनम्।"**[7]

यथा ऋत्विग्भिः यागे अग्निहोत्रादीनामनुष्ठाने स्वतः कर्माणि सम्पाद्य अग्निचयनादीनि कर्माणि सेवन्ते तद्वत् ब्राह्मणकाले स्त्रीणामपि यागेषु अधिकारः सुतरामासीत्, यस्य प्रमाणं सूत्रग्रन्थेषु स्मार्त्तसाहित्ये प्रतीयते। शास्त्रीयसिद्धन्तमुपलक्षयन् धर्मिकविश्वासोऽपि जायते यत् पत्युः सेवा स्त्रीणां श्रेष्ठधर्मः, तया सेवया एव स्त्रीणां परमार्थप्राप्तिः श्रूयते। तच्च विधानं वैवाहिकाग्नौ प्रारभते। तत्र तत्र विवाहादिसंस्कारैः संस्कृता जाया पत्नी स्त्री इत्यादिभिः नामभिरभिजायते। वैदिकसंस्कारैः संस्कृता स्त्री पतिसेवां विधाय परमार्थं लभत इति प्राचीनसिद्धान्तः श्रूयते।

**"वैवाहिको विधिः स्त्रीणां संस्कारो वैदिको मतः।**
**पतिसेवा गुरौवासौ गृहस्थौग्नि परक्रिया।**[8]

पतिसेवा गुरौवासः गृहस्थाग्नौ नित्यं सायंप्रातः अग्निहोत्राद्यनुष्ठाने सहभागिता एव प्राचीनानां मतमासाद्यते स्त्रीधर्मपरिप्रेक्ष्ये। तदतिरिच्य अन्यानि कर्माणि यथावत् प्राप्ते सति तेषां कर्मणामवान्तरफलं प्राप्यते। अतः अग्निपरग्रहादिकर्माणि यद्यपि आध्यात्मिकतामुपयाति तथापि पत्युः सेवैव परमधर्मतया तत्र स्वीक्रियते। सा च साध्वीति पदेन पतिसेवया अभिधीयते। उच्यते

**नान्य उत्पन्ना प्रजास्तीह न चाप्यन्यपरिग्रहे।**
**न द्वितीयश्च साध्वीनां क्वचिद् भर्तोपदिश्यते॥"**[9]

मध्यकाले स्त्रीणां प्रशस्तिः क्रमशः राजभिः सह कूटनैतिकविधिव्यवस्थायां परामर्शदात्रीत्वेन सहभागिता श्रूयते। पतिसेवामतिरिच्य पत्युः उत्तरोत्तरकल्याणार्थं युद्धेषु तासां योगदानमपि मध्यकालीनभारतस्येतिहासाद् ज्ञायते। उच्यते

**रूषामभावे पूर्वस्य धनभागतरोत्तरः।**
**स्वर्यातस्य पुत्रस्य सर्वेस्वयं विधिः॥"**[10]

प्राचीनशास्त्रेषु स्त्रीणां पुनर्विवाहस्य परम्परा अतीव प्राचीनेति लक्ष्यते। स्मार्त्तक्रियाविधौ स्त्रीणां पुनर्विवाहस्य परम्परा सूत्रकाले सूक्ष्मतया प्राप्यते। परन्तु तथा विधानं क्वचिदेव शास्त्रेषु अभिहितो वर्तते।

**"न उद्वाहिकेषु मन्त्रेषु नियोगः कीर्त्यते क्वचित्।**
**न विवाहविधावुक्तं विधवावेदनं पुनः॥"**[11]

**भाष्यकाले मन्त्रार्थदृष्ट्या नारी**

मानवजातेः आधारत्वेन नारी पूज्यते। असौ नारी पुरुषेण सह ब्रह्मणः सकाशात् सृष्टिः। विश्वस्यास्य प्राचीनतमसाहित्येषु वेदेष्वपि अस्याः विषये प्रोच्यते तदर्थं कथ्यते ऋग्वेदे

**अधः पश्यस्व मोपरि संतरां पादकौ हरा।**
**मा ते कशप्लकौ दृशन्त्स्त्रीहि ब्रह्मा बभूविथ॥**[12]

अत्र नारीणां सुरक्षाविषये अन्येषां पुरतः स्वस्य मुखं नोद्घाटयितुं प्रोवाच। ततः परं पुनः कथ्यते यत्

**मम पुत्राः शत्रुहणोऽथो मे दुहिता विराट्।**
**उताहमस्मि संजया पत्यौ मे श्लोक उत्तमः॥**[13]

तात्पर्यं भवति यन्मम पुत्राणां हननकर्त्री ममैव पुत्री विराट् तेजस्विनी स्वयं सपत्नीनां कृते अग्रे वर्धताम्। किञ्च

**उदसौ सूर्यो अगाद् उदयं मामको भगः।**
**अहं तद्विद् वला पतिमभ्यसाक्षि विषासहिः॥**
**अहं केतुरहं मूर्धाहमुग्रा विवाचनी।**
**ममेदनु क्रतुं पतिः सेहानाया उपाचरेत्॥**
**मम पुत्राः शत्रुहणोऽथ मे दुहिता विराट्।**
**उताहमस्मि सञ्जया पत्यौ मे श्लोक उत्तमः॥**[14]

अस्य मन्त्रस्य द्रष्ट्री शची पौलमी, देवता शची पौलमी, छन्दः निचृदनुष्टुप्, गान्धारश्च स्वरः।

इत्यत्र काचित् नारी सर्वज्ञानमयी भवति। विद्वत्सु मूर्धन्या वर्तते। उच्चकोट्यां वक्त्री च वर्तते। अन्यासु पत्नीषु न स्यात्। तदर्थं सायणः कथयति यत् केतयित्री सर्वस्य ज्ञात्री भवामि। सर्वेष्ववयवेषु शिर इव प्रधानभूता च भवामि। उद् गूर्णा सती विशेषेण पतिं वाचयित्री भवामि। ममैव कर्म बुद्धिं वा अनुलक्ष्य पालायिता भर्ता उपागच्छेत्। नान्यासां पत्नीनाम्। किञ्च

**असपत्ना सपत्नघ्नी जयन्त्यभिभूवरी।**

**आवृक्षमन्यासां वर्चो राधो अस्थेयसामिव॥**[15]

अर्थात् शत्रूणां नाशनेन कश्चित् शत्रुरहितो भवेत्। शत्रूणां पराभवकारणात् सर्वासां सपत्नीनां समूलं नाशनिमित्तं प्रयत्नमकरोत्। यथा अस्थिरः कश्चित् धनं विना प्रयासं कर्त्तुं न शक्नोति। इत्थं मन्त्रेष्वपि नारीणां विषये चर्चा श्लाघ्यते। वेदे यथा नारीणां स्थितिः उत्तमा वर्तते तद्वत् भाष्येऽपि तद्भिन्नता सायणेन न कृता वर्तते।

**दाये स्त्रीणामधिकारः**

**अभ्रातेव पुंस एति प्रतीची गर्तारूगिव सनये धनानाम**[16] इति मन्त्रदर्शनाद्वैदिककाले स्त्रीणां दाये अधिकारो बभूव इति बहुधा ऋचामथर्वाणामभिप्रायः स्पष्टीयते। यतः पुत्राभावे यद्यपि स्त्रीणां दायेषु अधिकारः आसीदिति लक्ष्यते कुत्रचित् उभयोः समाधिकारत्वमपि सुतरां भवेत्। श्रुतिरनुगुणं स्मृतिसाहित्ये बहुधा दायाधिकारसन्दर्भे स्त्रीणां विचारो ध्वन्यत इति बौधायनसूत्रप्रमाणम्। यथा- **मातुरलङ्कारं दुहितरस्साम्प्रदायिकं लभेरन् अन्यद्वा।**[17]

षड्विधं स्त्रीधनं प्राचीनशास्त्रीयमध्ययनात् प्राप्यते। यथा-

**अध्यग्न्यभ्यावाहनिकं भर्तुदायं तथैव च।**

**भातृदत्तं पितृभ्यां च षड्विधं स्त्रीधनं स्मृतम्॥**[18]

अत्र पितृमातृप्रभृतिभिः प्रदत्तं धनं विवाहसमये प्रदत्तं धनमधिवेदनिकार्थं प्रदत्तं च धनं स्त्रीधनत्वेन ख्यायते। तत्र केवलं स्त्रीणामधिकारत्वं श्लाघ्यते।

**पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतम्।**

**आधिवेदनिकार्थं च स्त्रीधनं परिकीर्तितम्॥**[19]

स्त्रीधनानामपि अकाले पत्युः कर्मणि सहायकं भवतीति सूचना प्राप्यते। उच्यते तत्र योगेश्वरयाज्ञवल्क्येन यत्

**दुर्भिक्षे धर्मकार्ये च व्याधौ सम्प्रतिरोधके।**

**गृहीतं स्त्रीधनं भर्ता न स्त्रियै दातुमर्हति॥**

**अधिविन्नस्त्रियै दद्यादधिवेदनिकं समम्।**

स्त्रीधनं पुत्रेण दुहितया वा क्रमशः दायसन्दर्भे अनुगमनं कर्त्तुं शक्नोति। परन्तु तद् धनं कदाचिदपि अनेन केनापि स्वीकर्त्तुं न शक्नोति। स्वेच्छया प्राचीनकाले स्त्रीधनं कस्मैचिदपि दातुं शक्यते। पुत्रदुहितरं च अस्मिन् अधिकारो विज्ञानेश्वरेण प्रतिपादितो वर्तते।

**न दत्तं स्त्रीधनं यस्यै दत्ते त्वर्धं प्रकल्पयेत्॥**[20]

**यथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा।**

**उपसंहारः**

प्राचीनकाले स्त्रीणां प्रतिपत्तिर्यथा आसीत् ईदानीं तु तत्र बहुधा परिवर्त्तनं जातम्। परन्तु कालान्तरे इतोऽपि तत्र परिवर्त्तनं भवितुमर्हति। प्राचीनव्यवस्थातः साम्प्रतिकव्यवस्थायामत्र बहुधा भिन्नता लक्ष्यते। श्रौताग्निहोत्रादिकर्मणि स्त्रीणामधिकारत्वं बहुधा वैदिकसंस्कृतौ आसीत् परन्तु यथा स्वातन्त्र्यं न परिलक्षितं यथा साम्प्रतिककाले अस्य प्रसक्तता व्यज्यते।

**तस्यामात्मनि तिष्ठन्त्यां कथमन्यो धनं हरेत्॥**[21]

**द्रव्यमपुत्रस्य सोदर्या भ्रातरः सहजीविनो वा हरेयुः कन्याश्च।**[22]

**सन्दर्भग्रन्थसूची**


१.ऋग्वेदसंहिता,श्रीमत्सायणाचार्यविरचितमाधवीयवेदार्थप्रकाशसहिता, श्रीमन्मोक्षमूलरभट्टः, कृष्णदास अकादमी, वाराणसी

२.वैदिकसाहित्य और संस्कृति, बलदेव उपाध्याय, काशी, १९५८

३.मनुस्मृतिः, मन्वर्थमुक्तावली सहिता, चौखम्बा संस्कृत सीरीज, आफिस, वाराणसी, १९७०

४.अथर्ववेदसंहिता, सायणाचार्यकृतभाष्यसहित, सं. विश्वबन्धु, विश्वेश्वरानन्द वैदिकशोधसंस्थान

५.बौधायनधर्मसूत्रम्, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी,

६.पारस्करगृह्यसूत्रम्, भाष्यपञ्चकभूषितम्, वेंकटेश्वरमुद्रणयन्त्रालय, मुम्बई, सं. १९८४

७.याज्ञवल्क्यस्मृतिः मिताक्षरासहिता, नागप्रकाशक, दिल्ली, २०११


**सङ्केताक्षरसूची**

1 ऋ.सं . १०२.१५९.
2 ऋ .१९ सा.३३.८ .सं .भा ,.द.भा .
3 म५६.३ .स्मृ .
4 सं. ३.३०.२
5 या७७.२ .स्मृ .
6 या८२.२ .स्मृ .
7 पा५.८.२ .गृ .
8 मनु. ५.१६२
9 मनु. ५.१६३
10 वि६.३४.२ .स्मृ .
11 म६५.९.स्मृ .
12 ऋ.सं. ८.३३.१९
13 ऋ.सं. १०.१४९.३
14 ऋ.सं. १०.१५९.१-३
15 ऋ.सं. १०.१४९.५
16 ऋ. सं. १.१४.७
17 बौ. सू. २.४४
18 मनु. १.१९४
19 या. स्मृ. २.१४३
20 या. स्मृ. २.१४७-१४८
21 मनु. २.१३०
22 कौ.अ. ३.५.१